International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(1): 420-426
© 2021 IJSR
www.anantaajournal.com
Received: 11-10-2020
Accepted: 02-12-2020

**Dr. T Pardhasaradhia**
Research Scholar,
Department of Puranethihasa,
National Sanskrit University,
Tirupati, Andhra Pradesh, India

**Corresponding Author:**
**Dr. T Pardhasaradhia**
Research Scholar,
Department of Puranethihasa,
National Sanskrit University,
Tirupati, Andhra Pradesh, India

# ब्रह्माणडपुराणान्तर्गतस्य अर्थपञ्चकम्

**Dr. T Pardhasaradhia**

**प्रस्तावना:**

सलकचराचरजीवराशिषु विलक्षणविशिष्टज्ञानसम्पन्नोऽयं मानवः इतरेभ्यः सर्वेभ्यः अस्मिन्जगति जाते मानवक्रमेण आलोचनानि अधिकानि भवेयुः। तदनुभावानन्तरं वायदा कदापि वा तस्मिन्नवशायं उत्पद्यन्ते केचन संन्देहाः। कोऽहं? कस्मादागतवानहं? इतः पुनः कुत्र गमिष्यामि? अहंयद्वाञ्छामि, तत् किमर्थं न सिध्यति? वाञ्छाभावेऽपि भोगाः, रोगाःकथं सिध्यन्ति? इत्थं कःकरोति? तस्य परमात्मनः स्वरूपं किम्? तस्य स्वभावःकीदृक् इत्यादि।

कोऽपि लक्ष्याधिकारिः, भिक्षाधिकारिः वा प्रस्तुतस्थितेः असन्तुष्ठः वा, प्रस्तुतस्थितेः अधिकानन्दं प्राप्तुं बहु प्रयतते।आस्थिको वा नास्थिको वा, रक्तो वा विरक्तो वा यः कोऽपि कदापि प्रकृतिदेहमिदं विहाय गन्तुं इच्छति स्म। तस्य कारणं किमुत्युक्ते तत् ज्ञापयति तत्वशास्त्रम् तस्मादेव मानवस्य अत्यावश्यकं भवति तत्वशास्त्रम्।

मातरं विहाय शिशुःन स्थास्यति,शाखां विहाय पत्रं न जीवति, देहं विहाय जीवोऽपि न जीवति पञ्चभूतात्मकमिदं देहं धृत्वा पञ्चभूतेषु यत्किमपि आहाररूपेण यदि न स्वीकरोति चेत् जीवनं कष्टं स्यात् तथैव शरीरस्य अन्तर्यामी जीवात्माऽपि परमात्मविषयकं तत्वज्ञानं नास्तिचेत् न जीवेत्। शरीरस्य स्थितेः वृद्धेश्च आहारं यदा आवश्यकं तथैव आत्मनः स्थितेः वेकासायच परमात्मविषयकं तत्वज्ञानमत्यावश्यकं भवति। तत्वज्ञानं तु पञ्चविधम्। तदेव अर्थपञ्चकमित्युच्यते।

पुनरावृत्तिरहितस्य जन्मनः जरायाः व्याधेः मरणादि धुःखरहितस्य नित्यस्य निरवद्यस्य निरवच्छिन्नस्य आनन्दस्थितेः प्रत्यर्यमत्यावश्यकानि भवन्ति पञ्चविधज्ञानानि।तानि कानि इति चेत्–

1. कोऽहम्? आत्मनः स्वरूपं कीदृक्? स्वभावः कीदृक्? इति प्रथमं जिज्ञास्य ज्ञानम्।
2. आत्मनःजन्मजराव्याधिवार्थक्यसुखदुखदायकः शासकः कः?

   तस्य स्वरूपं कीदृक्? स्वभावश्चकीदृक्? इति द्वितीयंजिज्ञास्य ज्ञानम्।

3. आत्मनः वाञ्छायाःआनन्दस्थितेः तस्य स्वरूपं कीदृक्? स्वभावः कीदृक्? इति तृतीयं जिज्ञास्. ज्ञानम्।
4. तस्यआनन्दस्थितेः प्राप्यर्थं साधनानि कानि? तस्य स्वभावः कीदृक्? इति चतुर्थं जिज्ञास्यज्ञानम्।
5. तमानन्दस्थितिमध्यवधिमया किमर्थं नानुभूतम्? किमर्थं न प्राप्तम्? तस्य कारणं किम्? तसय स्वभावः कीदृक्? इति पञ्चमं जिज्ञास्य ज्ञानम्।

एते। पञ्चविधज्ञानानां परमज्ञानसम्पन्नाः पिल्लै लोकाचार्याः अष्टादशरहस्येषु अर्थपञ्चकमिति मणिप्रवाळभाषायां व्यरचयन्। अष्टादशपुराणेषु ब्रह्माण्डपुराणे अन्तर्गततया अर्थपञ्चकमिति विराजते।

[1]अर्थपञ्चकविवरणम् –

प्राप्यस्यब्रह्मणो रूपं प्राप्तुश्च प्रत्यगात्मनः।
प्राप्त्युपायंफलञ्चैव तथा प्राप्ति विरोधि च।।

ब्रह्माण्डपुराणश्लोकानुसारेण स्वस्वरूपम्, परस्वरूपम्, उपायस्वरूपम्, विरोधिस्वरूपम्, फलस्वरूपमिति अर्थपञ्चकम्। अर्ऍथपञ्चकज्ञानेन जीवस्य संसारात्विमुक्तिःस्यात्।

1. स्वसवरूपम् – नाम जीवात्मनः स्वरूपम्।अयं [2]जीवात्मा [3]नित्यः, मुक्तः[4] बद्धः,[5] केवलः[6], मुमुक्षुः[7], इति पञ्चनिधः।

नित्यःनाम संसारगन्धरहिताः, निर्दोषाः, भगवदनुवश्यानुकूलाः अनादि कालात् स्त्रवेश्वरस्य अनुग्रहेण ज्ञानसंकोचरहिताः। एते नित्यकैङ्कर्यपरः, अनन्तगरुडविष्वक्सेनादयः। एतेषां सर्वसाधारणतया अनुत्व, ज्ञानत्व,अमलत्व, भगवत्शेषत्वपारतन्त्र्यादयः सन्ति।

मुक्ताः नाम भगवदनुग्रहेण सुकृति द्वारा सुखदुःखमेहबन्देभ्यः विमुक्ताः सन्तः परमात्मनःस्वरूपं कल्याणगुणान् वैभवञ्च अनुभूयतेनानुभावेन जातस्य प्रीतेंःअतः मुखेन च संन्तुष्य पुनरागमनरहिते वैकुण्ठनगरे वसन्तः आनन्दमननशीलाःभवन्ति। बद्दाः नाम पृथिव्यप्तेजोवायुराकाशादि पञ्चभूतैः निर्मितमनित्यं सुखदुःखयोः अनुभवेन, अज्ञानेन अपवित्रतया अन्यथा ज्ञानेन विपरीतज्ञानेन च देहदारुढ्यो भूत्वा विषयानुभवेन जातं हेहपोषणमेव पुरुषार्थमिति संभाव्य प्राणिनां हंसनेन परद्रव्याणामपहरणेन सँसाराभिवृद्यै आसक्ताः भूत्वा भगवति विमुखाः चेतनाः। केवलाः नाम एकान्तप्रदेशे अत्यन्तक्षुत्पिपासादिभिः बाधातप्ताः। भक्ष्याभक्ष्यनियमरहिताः सन्तः स्वशरीरस्वानुभवेन सन्तुष्ठाः भवन्ति। आत्मा, प्रकृतिः, इतिविवेचनज्ञानेन दुःखाधिख्यतया परिपूर्णज्ञानानन्दात्मकस्य परमात्मनः विवेचनं कर्तुमशक्येन अमृतप्रवाहरूपं मुक्तें विहाय जीवात्मप्राप्तेः साधनस्य ज्ञानयोगस्य निष्ठाः सन्तः फलरूपं जीवात्मानुभवमात्रमेव पुरुषार्थफलरूपेण अनुभाव्य संसारबन्धं

[1] अर्थपञ्चकम् – मलं कर्म च माया च मायोत्मखिलंजगत् । तिरोधानमयी शक्तिः अर्थपञ्चकमिष्यते ।। (शैवमते)

[2] जीवात्मा - नित्यः, मुक्तः, बद्धः केवलः, मुमुक्षुः इति पञ्चविधः।

[3] . नित्यः-कालपरिच्छिन्नः। कालपरिच्छेदरहितः। (श्रुतप्रकाशिका जीव )कदाचिदपि भगवदभिमतविरुद्धाचरणाभावेन ज्ञानसङ्कोचप्रसङ्गरहितः । य द्विपरार्थकालं विनाशरहितः (रामायणे)। भगवन्नित्यपरिवारः। सर्वकालव्यापी (श्री त) (वि.को.पृ133)

[4]. मुक्तः अकर्मवश्यः।श्री सुषुम्नाडीं प्रविश्य तथा ब्रह्मरन्ध्रान्ष्क्रम्य अर्चिरादिमार्गेण विरजां तीर्त्त्वा सूक्ष्मशरीरं विहाय श्रीवैकुण्ठदिव्यनगरं प्रविश्य आविर्भूतगुणाष्टकः उत्तरावधिरहितब्रह्मानुभाववान् । य कर्मसम्बन्ध कृत देहादि विनिर्मुक्तः। श्री. स्वसमानाधिकारण्यस्वसमानकालीनत्वोभयसम्बन्धेन कर्मप्रागबावविशिटान्यकर्मध्वंससमानाधिकरणपरमात्मानुभवरूपमोक्षवान् ।

[5] बद्धः – (जीवः) अनुवृत्तजीवसंसारः। वि. (वि.को.पृ.177)

[6] केवला नाम उदासीनः। फलाभिसन्धिपूर्वकर्त्तृत्वभाववान् ।
श्वे तादात्विकस्वयत्ननिरपरेक्षः । (गद्यत्रये)

[7] मुमुक्षवो नाम – कतिपयक्लेशादि रहिताः। मुमुक्षा – हैरण्यगर्भान्तसकलभोगविरक्तिपूर्वकब्रह्मानन्दप्रेप्सा । (छान्दोग्योपनिषद्) मुमुक्षुः – प्राग्भवीयपुण्यमहिमक्षीणकाम्यरुचिः । (त) ब्रह्मानन्दैकप्रेप्सुः। (छान्दोग्योपनिषद्) (वि.को.पृ 203)

भगवच्प्राप्तिश्च दूरीकृताः केवलाः। मुमुक्षुः नाम मोक्षे इच्छावान्। उपासका, प्रपन्नाः, इति मुमुक्षवः द्विविधाः।

2. परस्वरूपम् - [8] परस्वरूपं नाम [9] परमात्मनः स्वरूपम्। परमात्मनः [10] पर,व्यूह [11] , विभव [12] , अन्तर्यामि, [13] अर्चावतार[14] इति पञ्चविधाः। पर नाम परमपदे क्षीरसागरे अनन्ते शेयनस्थितः, सुन्दरज्योतिस्वरूपः।

[15] व्याहः नाम सृष्टेः रक्षणाय संहारायच कत्तारः वासुदेव, सङ्कर्षण, प्रद्युम्न, अनिरूद्ध, पद्मनादादयः।

[16] विभवः नाम अवतारः रामकृष्णाद्यवताराः विभवाः स्वस्वरूपावेशाः। शक्त्यावेऐशाः विभवाः इत्युच्यन्ते।

[17] अन्तर्यामि नाम जीवात्मनां सर्वेषामन्तः प्रविश्य शासकः भक्तानां, नमस्कतानां हृदयकमले विलक्षणाकारेण प्रवृत्ति निवृत्योः

---

[8]परस्योपासनं चैव तत्स्वरूपं मुने श्रुणु ।। 2 ।।
प्रपञ्चो द्विविधःप्रोक्तो विद्याऽविद्या प्रभेदतः ।
विद्या मया त्रिपाद्भूतिरिति प्रोक्ता सनातने ।। 3 ।।
अविद्या मयमेतद्वै प्राकृतां तान्यनेकशः ।
पादभूतिरिति प्रोक्ता सततं ब्रह्मवादिभिः ।। 4 ।।
विभूतिद्वयमध्यस्थौ विरजाऽमृतवाहिनी ।
सा हि प्रकृति सीमान्ता शुद्धसत्वमया श्रुणु ।। 5 ।।
तस्याःपरे परव्योम्नि दिव्यतेजो विराजते । (ब्र.पु.अ 29-2,3,4,5)

[9] परमात्मा – आत्मान्तररहितः। वि. उत्कृष्टस्वभावः। रा. देशकालस्वरूपानवच्छिन्नव्याप्तिः। (देशकालानवच्छिन्ना व्याप्तिः यस्येति बहुव्रीहिः।) तथा च व्याप्तत्वात् व्याप्यस्यैव न नाशः। सर्वात्मत्वेन सर्वकालवर्त्तित्वं च सिद्धम्। ता. परो मा अस्येति परमः। परमश्चेसौ आत्मा च। यथा सर्वाणि भूतानि अनेनात्मवन्ति नैवमयमन्येन केनचित्। सह. परमश्चासौ आत्मा च, आप्नोतीत्यात्मा(स्वयमात्मान्तररहितः)। वि. परमश्चासावात्मा च परमात्मा। सर्वजीवात्मभ्य उत्कृष्ट इतयर्थः। रा. यथाऽसो सर्वेषामात्मा न तथाऽस्य कश्चिदित्यतः परमात्मा। ता. स्वरूपेणावस्थितः प्रत्यगात्मा। गी.(वि.को.पृ.147)\

[10] परस्वरूपम् - उद्यद्भानुसहस्रभास्वरपरव्योमास्पदं निर्मलज्ञानानन्दघनस्वेरूपममलज्ञानादिभिः षड्गुणैः। जुष्टं सूरजनाधिपं धृतरथीङ्गाब्जादि भूषोज्वलं श्रीभूसेव्यमनन्तभोगिनिलयं श्रीवासुदेवं भजे । (परत्वादि पञ्चकम् श्रीपतिस्तुतिमाला पृ 07)

[11]व्यूहवासुदेवस्तुतिः –आमोदे भुवने प्रमोद उतसम्मोदे च सङ्कर्षणं प्रद्युम्नं च तथाऽनिरुद्धमपि तान् संहारसृऐष्टिस्थितीः। कुर्वाणान्मतिमुख्यषड्गुणवरैः युक्तां स्त्रियुग्मात्मनकैः व्यूहाधिष्टितवासुदेवमपि तं क्षीराब्धिनाथं बजे ।(परत्वादि पञ्चकम2)

[12] विभवस्तुतिः – वेदान्वेषणमन्दराद्रिभरणक्ष्मोद्धारणप्रश्रितप्रह्लादावनभूमिभिक्षणजगद्विक्रान्तयो यत्क्रियाः । दुष्टक्षत्रनिबर्हणं दशामुखाद्युन्मीलनं कर्षणं काळिंद्या अतिपापकंसनिधनं यत्क्रीडितं तन्नुमः। (परत्वादि पञ्चकम3)

[13] अन्तर्यामि – यो देवादिचतुर्विधेषु जनिषु ब्रह्माण्डकोशान्तरे सम्भक्तेषु चराचरेषु च विशन् आस्ते सदान्तर्बहिः। विष्णुस्तं निखिलेष्वणुष्वणुतरं भूयस्सुभूयस्तरं स्वाङ्गुष्ट्प्र।तिमं च योगिहृदये ष्वापीनमीशं भजे ।। (परत्वादि पञ्चकम4)

[14]अर्चरादिः – श्रीरङ्गस्थलवेङ्कटाद्रिकरिगिर्यादौ शतेऽष्टोत्तरे स्थाने ग्रामनिकेतनेषु च सदा सान्निध्यमासेदुषे। अर्चारूपिणमर्चकाभिमतितस्सवीकुर्वते विग्रहं पूजां चाखिलवाञ्छितान् वितरते श्रीशाय तस्मै नमः ।।(परत्वादि पञ्चकम् 5)

[15]व्यूहस्वरूपं कथय ! हरेर्विष्णोर्महात्मनः ।
उपासनञ्च देवेश ! कथयस्व पितामह ! ।। 1 ।।
ब्रह्मा –
पुरीविष्णुर्देवलोकान् स समूह्य स्वमायया ।
एक एवाऽद्वितीयोऽभूच्छिषे शिष्ये जनार्थनः ।। 2 ।।
योगनिद्रां समापन्नो निमीळ्य नयनद्वयम् ।
नीत्वा तु सुचिरं कालं योगनिद्रां जले प्रभुः ।। 3 ।।
त्रिजगत्स्रष्टुकामस्सन् मायया मधुसूदनः ।(ब्र.पु.अ 28-1,2,3)

[16]विभवस्य स्वरूपञ्च तस्योपासनमेव च ।
प्रब्रू हि परमं तस्य देवदेवस्य शार्ङ्गिणः ।। 2 ।।
ब्रह्मा –
वैभवञ्च प्रवक्ष्यामि ब्रह्मणःपरमात्मनः ।
यच्छ्रुत्वा परमाप्नोति क्षिप्रं वै वाञ्छितान्यपि ।। 3 ।।
वैभवो नाम भगवदवताराःह्यनेकशः ।
चरित्रश्रवणं तेषामुपासनमिहोच्यते ।। 4 ।।(ब्र.पु.अ 19-2,3,4)

[17]इदानीं श्रोतुमिच्छामि सर्वान्तर्यामिणःप्रभोः।
उपासनविधिं देव ! ममाख्या हि पितामह ! ।।2 ।।
इति पृच्छति मौमाशे ब्रह्मलोकगुरुःपिता ।
प्रत्युवाच मुनिश्रेष्टं महाभागवतोत्तमम् ।।3 ।।
श्रुणु वत्स ! प्रवक्ष्यामि मोक्षसाधनमुत्तमम् ।
लोकान्तर्यामिणो विष्णोस्सदोपासनमेव हि ।। 4 ।।

सर्वदा पश्यन् स्थितः अन्तर्यामि इति।[18] अर्चावतारः नामभक्तानामभीष्टं स्वेरूपं धृत्वा तेषां प्रीतिकरेण नाम्ना व्यवहरन् जितस्सन् सर्वज्ञः अपि सर्वशक्तिसम्पन्नोऽपि सर्वरक्षकोऽपि सर्वसुलभः आलयगृहारण्यदेशकालपरिमितरहिततया स्थितः सर्वेश्वरः। स्वयंव्यक्तम्, दिव्यम्, पौराणिकम्, मानुषम्, गृहार्चनमिति पञ्चधा व्यवस्थितः।

3. उपायस्वरूपम् - उपायः नाम परमात्मनः प्राप्तेः मार्गः। कर्मयोगः, ज्ञानयोगः, भक्तियोगः, प्रपत्तियोगः, आचार्याभिनॉमनमितिपञ्चधा स्थितः।
4. विरोधिस्वरूपम् - परमात्मनः प्राप्तेः चेतनस्य अवरोधः एव विरोधिरित्युच्यते। स्वरूपविरोधि, परत्वविरोधि, पुरुषार्थविरोधि, उपायविरोधि, प्राप्तविरोधि इति विरोधि स्वरुपं पञ्चविधम्।
5. पुरुषार्थस्वरूपम् - धर्मः, अर्थः कामः, मोक्षः इति पुरुषार्थः चतुर्विधः। इत्थॅम् अर्थपञ्चकज्ञानेन मुमुक्षुः चेतनः स्वस्ववर्माश्रमानाम् उचितरीत्या भोजनभाजनादीनि सम्पाद्य भगवतः निवेद्य स्वशक्तिसाम्र्थ्यमनुश्रुत्य भगवत्भक्तान् संसेव्य देहधारणमिदं भगवदनुग्रहमिति ज्ञात्वा जीवनेन तत्वोपदेशनुसन्धानेन प्राप्तेः त्वरया भगवद्विषये आर्त्तस्सन् आत्मरक्षमविषये अशक्तोऽहमिति ज्ञात्वा, भारः भगवति एव उपस्थाप्य ज्ञानानुष्ठानैऐः भगवतः अत्यन्त प्रीतिपात्रः स्यात्।

अतः अस्य[19] अर्थपञ्चकस्य विवरणरूपेण श्रीब्रह्माण्डपुराणे स्थितस्य अध्यतनकाले उपलब्यमाने श्रीब्रह्माण्डपुराणे अदृश्यमानस्य प्राचीनग्रन्थः मया स्वीकृतः।

प्राप्यस्यब्रह्मणो रूपं प्राप्तुश्च प्रत्यगात्मनः।
प्राप्त्युपायंफलञ्चैव तथा प्राप्ति विरोधि च।।
लोकाचार्याय गुरवे कृष्णपादस्य सूनवे ।
संसारिभोगिसन्दष्टजीवजीवात्मने नमः ।।

ईश्वरस्वरूपं परव्यूविभवान्तर्याम्यर्चावतारभेदेन पञ्चविधम्। तत्र परत्वं नाम अकालकल्येऽनन्तानन्दमये देशविशेषे नित्यमुक्तैर्भोग्यतयावस्थानम्।व्यूहो नाम सृष्चिस्थितिसंहारार्थम् संसारिरक्षणार्थम् उपासकानुग्रहार्थञ्च सङ्कर्षणप्रद्युम्नानिरुद्ध रूपेणावस्थानम्। परस्वरूपे ज्ञानादयः षड्गुणाः पूर्त्या प्रकाश्यन्ते, व्यूहेषु प्रत्येकं द्वौ द्वौ गुणौ प्रकाशेते। तत्र सङ्कर्णो नाम ज्ञानबलाभ्युंक्तो जीवतत्वमधिष्ठाय, तच्च प्रकृतेर्विविच्य प्रद्युम्नावस्थां च प्राप्य शास्त्रप्रवर्त्तनं जगत्संहारञ्च करोति। प्रद्युम्न ऐश्वर्यवीर्याभ्यां युक्तो मनस्तत्वमधिष्ठाय धर्मोपदेशं मनुचतुष्टयादि शुद्धवर्गसृष्टिञ्च करोति । अनिरुद्धस्तु शक्तितेजोभ्यां युक्तो रक्षणे ततत्वज्ञानप्रदाने कालसृष्ट्यौ चाधिकृतो भवति।

विभवश्चानन्ता गौणमुख्यभेदेन द्विविधाश्च मनुष्यत्वतिर्यत्तवस्थावरत्ववत् गौत्वमपीच्छाकृतम्, न स्वरूपतः।तेष्वप्राकृतविग्रहा अजहत्स्वभावविभवाःदीपोत्पन्न दीपतुल्याः मुख्यप्रादुर्भावाः सर्वेऽपि मुमुक्षाणामुपास्याः। विधिशिवपावकव्यास जामदग्न्यार्जुन वितत्शादयो गौप्रादुर्भावाः सर्वेऽहङ्कारयुक्तजीवाधिष्ठातृत्वाद् मुमुक्षूणीमनुपास्याः। नित्योदितशान्तोदितादिभेदः, जाग्रतसंज्ञादिचातुरात्म्यम्, केशवादिमूर्त्यान्तराणि, षड्विंशद्भेदभिन्नाः पद्मनाभादिविभवाः, उपेन्द्रत्रिविक्रमदधिभक्तहयग्रीवनरनारायणहरिष्णमस्त्य कूर्मवराहाद्यवतारविशेषाः, तदीयभुजायुधवर्णकृत्यस्थानादिभेदाश्च दुरवधारतया गृह्यतमतया चात्र नोच्यते। अवताराणां हेतुरिच्छा, फलं साधुपरित्राणादित्रयम्। बहुषु प्रमाणेषु

---

सर्वाधारं नियन्तारं सर्वव्यापिनमीश्वरम् ।
हृत्पुण्डरीकमध्यस्थं लक्ष्मीसहितमच्युतम् ।। 5 ।।(ब्र.पु.अ.19-2,3,4,5)

[18]अर्चैवोपासनामूलं तां विना वा नास्ति साधनम्।
तस्मादर्चा स्वरूपोऽहं भविष्याम्यचिदाद्भुवि।।7।।
तेनैव सर्वजगतां वृद्धिर्मुक्तिस्च जायते।
परोहमखिलाण्डानां सृष्टिमात्रप्रयोजकः।।8।। (ब्र.पु.अ 2-7,8)

[19]अर्थपञ्चकविज्ञानं गुह्याद्गुह्यतमं बुधाः।।30।।
प्रवक्ष्यामि सनातनं[19] यथोक्तंतद्भगवता श्रुणुध्वं मुनयस्तथा।31।।
जीवात्मा परमात्मा च उपायः फलमेव च
विरोधी त्यममीह्यर्थाः पञ्चभेदेषु कीर्त्तिताः।।32।। (ब्र.पु.अ 1-30-32)

भृगुशापादिभिराजायतेत्युक्त्याऽवताराणां हेतुः कर्म न भवेत् किम् इति चेत् शोपो व्याजमात्रम्, अवतारास्त्वैच्छिक एवेति तत्रैव समादितम्।

अन्तर्यामित्वं नाम अन्तःप्रविश्य नियन्तृत्वम्, स्वर्गनरकप्रवेशाद्यवस्थास्वपि सर्वेशां चेतनानां सहेयीभूय तदपरत्यागेनावस्थानम्, अथ च शुभाश्रयभूतदिव्यविग्रहविशिष्टतया तेषां ध्येयार्थं तेषां रक्षणार्थञ्च बन्धुभूय हृदयकमलेऽवस्थानञ्च।

अर्चावतारो नाम तमरुहन्ददेब्वुरुवम् इत्युक्तप्रकारेण चेतनाभिमतद्रव्यविषये विभवविशेषवदे देशकालाधिकारिनियमम् अन्तरैव अपराधान् अपश्यतो ऽर्चकपरतन्त्रसमस्तव्य.पारवत आलयेषु गृहेषु चावस्थानम्। रुचिजनकत्वम्, शुभाश्रयत्वम्, अशेषलोकशरण्यत्वं चेति सर्वमर्चावतारे परिपूर्णम्। स्वस्वामिभावव्यत्यासेन अज्ञवदशक्तवदस्वतन्त्रवच्च वर्त्तमानेऽपि अपारकारुण्यपरवशस्सन् सर्वापेक्षितानि ददाति।

**अर्थपञ्चकम्** - संसारिणश्चेतनस्य तत्वज्ञानमुत्पद्योज्जीवनसमये ऽर्थपञ्चकविज्ञानोत्पत्तिरावश्यकी। अर्थपञ्चकविज्ञानं नाम स्वस्वरूपपरस्वरूपपुरुषार्थस्वरूपोपायस्वस्वरूपविरोधिस्वरूपाणां याथात्म्यज्ञानम् । एतेष्वेकैकविषयः पञ्चधा भवति । स्वस्वरूपमित्यात्मस्वरूपमुच्यते। तच्चात्मस्वरूपं नित्य-मुक्त-बद्ध-केवल-मुमुक्षुभेदात्पञ्चविधम्। परस्वरूपं, परव्यूहविभवान्तर्याममय्यर्चावतारभेदात् पञ्चविधम्। पुरुषेणार्थनीयःपुरुषार्थः। स च धर्मार्कामात्मानुभवभगवदनुभवभेधात्पञ्चविधः। उपायश्च कर्मज्ञानभक्तिप्रपत्याचार्याभिमानभेदात्पञ्चविधः । विरोधी च परस्वरूपविरोधी, परत्वविरोधी, पुरुषार्थविरोध्युपायविरोधी, प्राप्तिविरोधी चेति पञ्चविधः।

तत्र नित्याः सदा संसारबन्धरूपावद्यरहिता भगवदानुकूल्यैकभोगाः श्रीवैकुण्ठनाथस्य पट्टबन्धनस्योचिता मन्त्रिण ईश्वरनियोगात्सृष्टिस्थितिसंहारान्कर्तुं शक्ताः। परव्यूहादि सर्वावस्थास्वप्यनुसृत्यकैङ्कर्यकरणशीलाः।विष्वक्सेनप्रभृतयोऽमर। मुक्ताः नाम भगवत्प्रसादेननिवृत्तिप्रकृतिसम्बन्धप्रयुक्तक्लेशमलाभगवत्स्वरूपरूपगुणविभवानुभूयानुभव जनितप्रीतेरुत्कूलत्वातद्वाचा यथा पर्याप्ति स्तुत्वा तृप्तिं विना वैकुण्ठमहानगरे वर्त्तमानाः सन्तोषानन्दयुक्ता मुनयः। बद्धो नाम पाञ्चभौतिको नित्यसुखदुःखानुभवपरिकर आत्मविश्लेषे

दर्शनस्पर्शनायोग्योऽशुध्यास्पदोऽज्ञानान्यथाज्ञानविपरीतज्ञानजनको देह एवात्मेति शब्दादिविषयानुभवजनितस्वदेहपोषणमेव पुरुषार्थ इति, शब्दादिविषयलाभौप यिकतया वर्णाश्रमधर्मान् विना असेव्यसेवां कृवा भूतहिंसां कृत्वा परदारपरद्रव्यापहारं कृत्वा संसारवर्धका भगवद्विमुखाश्चेतनाः।

केवलो नाम यथा एकाकि अत्यन्तक्षुत्पिपासाभ्यां पीडितो भक्ष्याभक्ष्यविवेकं कर्त्तुमशक्तः स्वदेहं स्वयमेव सम्भुज्य(भक्षित्वा) प्रसन्नो भवति। तथा संसारदावाग्निना तत्पस्सन् समसारदुःखनिवृत्यर्थं शास्त्रजन्यज्ञानेन प्रकृत्यात्मविवेकं कृत्वा प्रकृतेःदुःखाश्रयत्वहेयपदार्थसमूहत्वरूपकारमात्मनःकृतेः परत्वपञ्चविंशकत्वस्वयंप्रकाशत्व स्वतस्सुखित्व नित्यत्वाप्राकृतत्वरूपाकाराश्चानुसन्धाय पूर्वं स्वेनानुभूतदुःखाधिक्येनैत दल्पपरस्पर सक्तोज्ञानानन्दमयपरमात्मविवेकं कर्त्तुमशक्तोऽमृतसागरान्तर्मग्तानामोत्कर्षं त्यक्त्वा एतदात्मसाधनप्राप्तिभूतज्ञानयोगनिष्ठो योगफलमात्मानुवमात्रमेव पुरुषार्थत्वेनानुभूय पश्चात्संसारबन्धभगवत्प्राप्तिरहितो यावदात्मभाव्यशरीरी सञ्चरन् कश्चित्।

मोक्षेच्छूनां मुमुक्षव इति नाम। एते च मुमुक्षव उपासका मुमुक्षवः, प्रपन्नाश्चेति, द्विविधः। ईश्वरविषये परत्वं नाम परमपदे अवाक्यानादर इति वर्तमान आदिज्योतिरूपः परवासुदेवः, व्यूहो नाम सृष्टिस्थिति संस्कारकरत्तारः सङ्कर्षणप्रद्युम्नानिरुद्धाः। विभवो नाम रामकृष्णाद्यवताराः।

अन्तर्यामित्वमुभयविधम् । दासस्यान्तर्मान इति, ममात्म इति मम प्रापणा इति चोक्तप्रकारेणात्मनोन्तः, विकसत्कमलमद्हृदये प्रविश्य इति कमलवासिनी स्वयं चागत्य प्रविश्य इति अन्तःप्रविश्य स्वस्मिन्नादरवर्धकः सुन्दर इति विचारवतां विचारं सर्वं सहस्थित्वा जानासीति चोक्तप्रकारेण लक्ष्मीसहितो

विलक्षणविग्रहयुक्तो हृदयकमले सकलप्रवृत्तिनिवृत्तीः सदाऽवलोकयन् वर्तमानः।

अर्चावतारो नाम दासानां यदभिमतं तद्रूपवान् दासाभिमतं यन्नाम तन्नामवान् इत्युक्तप्रकारेण स्वार्थरूपनामरहित आश्रिताभिमतस्वरूपस्तत्कृतनामा स्ववंज्ञोऽप्यज्ञ इव सर्वशक्तिरप्यशक्त इवावाप्तसर्वकामोऽपि सापेक्ष इव रक्षकोऽपि रक्ष्य इव स्वस्वामिभावं विपरीतं कृत्वा नेत्रविषयतया सर्वसुलभ आलयेषु गृहेषु च वर्त्तमानः।

पुरुषार्थेषु धर्मो नाम प्राणिरक्षणौपयिकतया क्रियमाणवृत्तिविशेषः। अर्थो नाम, वर्णाश्रमनुरूपं धनधान्ये सङ्गृह्य देवताविषयेषु पित्र्येषु कर्मसु प्राणिविषयेषु चोत्कृष्टदेशकालपात्राणि ज्ञात्वा धर्मबुध्या व्ययीकरणम्। कामो नाम ऐहलोकिकः पारलौकिकश्चेति द्विविधः। तत्रैहलोकिकः, पित्रुमात्रुरत्नधनधान्यान्नपानीय दारपुत्रमित्रपशु गृहक्षेत्रचन्दनकुसुमताम्बूलवस्दिपदार्थेषुशब्दादिविषायानुभवप्रयुक्त सुखविशेष। पारलौकिको नाम, तद्विलक्षणेषु तेजो रूपेषु स्वर्गादिलोकेषु गत्वा क्षुत्पिपासाशोकमोहजरामरणादिकं विना आर्जितपुण्यानुरूपममृतपानं कृत्वा अप्सरोभिः सह शब्दादिविषयानुभवकरणम्।आत्मानुभवो नाम दुःखनिवृत्तिरूपं केवलात्मानुभवमात्रं च मोक्ष इति वदन्ति। अथ भगवदनुभवरूप परम पुरुषार्थलक्षणमोक्षो नाम प्रारब्धकर्मविषेषमामवश्यानुभाव्यानां पुण्यपापानां नाशे, अस्ति जायते परिणमते विवर्धतेऽपक्षीयते विनश्यतीत्युक्तप्रकारेण षड्भावविकारास्पदं तापत्रयाश्रयं भगवत्स्वरूपमावृत्य विपरीतज्ञानोत्पादकं संसारवर्धकं स्थूलशरीरमुपेक्षया त्यक्त्वा सुषुम्ना नाड्या शिरःकपालं भित्वा निर्गत्य सूक्ष्मशरीरेण वैकुण्ठं गन्तुम्मार्गं प्राप्योष्णकिरणमण्डलान्तर्गत्वा सूक्ष्मशरीरं वासनारेणुञ्च विरजा स्नानेन दूरीकृत्य सकलतापनिवर्त्तकामानवकरस्पर्शञ्च प्राप्य, शुद्धसत्वात्मकं पञ्चोपनिषणमयं ज्ञानानन्दजनकं भगवदनुभवैकपरिकरं तेजोमयमप्राकृतविग्रहं लब्ध्वा किरीटयुक्तेष्वमरेषु प्रच्छद्गच्छत्सु, श्रीमहामणिमण्डपं प्राप्य,लक्ष्मीसहितं भूमिनीळानायकं, देवसमूहेषु सेवत्सु ज्योतिप्रवाहाऽविर्भवद्रूपं श्रीवैकुणठनाथं नित्यमनुभूय नित्यकैङ्कर्यस्वभावविशिष्ठतया स्थितिः।

उपायेषु कर्मयोगो नाम यज्ञ, दान, तपो, ध्यान, सन्ध्यावन्दनपञ्चमहायज्ञाद्यग्निहोत्रतीर्थयात्रा पुण्यक्षेत्रवासकृच्छ्रचान्द्रायण पुण्यनदीस्नान व्रतचातुर्मास्यफलामूलाशनशास्त्राभ्यासभगवत्समाराधनजपतर्पणादि कर्मानुष्ठान प्रसक्त कायविशेषेण, पापनाशोत्पत्तौ, ततःइन्द्रियद्वारा प्रसरतो धर्मभूतज्ञानस्य शब्दादीनामविषयत्वेन, विषयापेक्षायांयमनियमासनप्राणायामप्रत्याहारध्यानधारण समाधि- रूपाष्टङ्गयोगक्रमेण योगाभ्यासकालपर्यन्तं ज्ञानस्यात्मानं विषयताकरणम्।

अयञ्च ज्ञानयोगस्य सहकारि ऐश्वर्यस्य प्रधानसाधनञ्च भवति। ज्ञानयोगो नाम, एवं योगजन्यज्ञानस्य हृदयमण्डलादित्यमण्डलप्रभृति स्थूलविषयेषु वर्त्तमानं सर्वेश्वरं विषयं कृत्वा तं विषयं शङ्खचक्रगदाधरं पीताम्बरकिरीटनूपुरादिदिव्याभूषमालङ्कृतं लक्ष्मीसहितं चानुभूययोगाभ्यासक्रमेणानुभवकालं वर्धयित्वाऽनवरतभावनारूपत्वापादनम्। अयञ्च भक्तियोगस्य सहकारी कैवल्यस्य प्रधानसाधनञ्च भवति। भक्तियोगो नाम तैलधारावदवच्छिन्नस्मृतिसन्तानरूपानुभवस्य प्रीतिरूपापन्नत्वापादनम्। तत्स्वरूपे विचारिते प्रारब्धकर्मनिवृत्यौपायिकतया साधनसाध्येऽनुष्ठाय तत्सङ्कोचविकासोपयोगपरिणामकरणम् ।

अथ प्रपत्युपायो नाम एवं कर्मज्ञानसहकृतभक्तियोगेऽशक्तानामप्राप्तानां सुकरःशीघ्रफलदः, उपायस्य सकृत्कर्तव्यत्वादुपायानुष्ठानसमनन्तरं जायमान भगवद्विषयानुभवानां प्राप्यकोटिटित्वाच्च स्वरूपानुरूपश्च भवति। इयं चार्त्तरूपप्पपत्तिर्हि आप्तरूपप्रपत्तिश्चेति द्विधा । तत्रार्त्तरूपप्पपत्तिर्नाम निर्हेतुकभगवत्प्रसादेन हेतुना शास्त्राभ्यासेन सदाचार्योपदेशक्रमेण च यथा ज्ञानोत्पत्यनन्तरं भगवदनुभवाय विपरीतदेहसम्बन्धस्य देशसम्बन्धस्य देशिकसहवासस्य च दुःसहत्वात्, भगवदनुभवस्यैकान्तं विलक्षणं देहं देसं देशिकांश्च प्राप्युमाधिक्येन श्रीवेङ्कटनायकस्य गर्भजन्मजराऽधिव्याधिमरणादि, निवर्त्कत्वात्, श्रीवेङ्कटनायकगत्यन्तरशून्यो दासोऽहं वेङ्कटाचलवासिने नमः इति पूर्णप्रपत्तिं कृत्वा बहुदर्शयित्वा किं

नाशयसि, एतत्तीरमारुह्य श्रान्तोऽस्मि, प्राप्युं कृपां कुरु, शापित्तोऽसि त्वया शापितोऽसि, अथाहं गन्तुं नानुजानामीति प्रतिरुध्य प्राप्तिः।

दृप्तप्रपत्तिर्नाम शरीरान्तरप्राप्तौ स्वर्गनरकानुभवेषु च विरक्तभीतिश्चोत्पाद्य तन्निवृत्यर्थं भगवत्प्राप्त्यर्थं सदाचार्योपदेशक्रमेणोपायस्वीकारं कृत्वा विपरीतप्रवृत्तिनिवृत्ता, वेदविहितवर्णाऽश्रमानुष्टानं भगवत्भागवतकैङ्कर्यञ्च मानसवाचिककायिकैर्यथाबलमनुष्टाय, ईश्वरस्य शेषित्व, नियन्तृत्व, स्वामित्व, शरीरित्व, व्यापकत्व, धारकत्व, रक्षकत्व, भोक्तृत्व, सर्वज्ञत्व, सर्वशक्तित्व, सर्वसम्पूर्णत्वावाप्तसमस्तकामत्वरूपाकारान्, स्वस्य तच्छेषत्व, नियाम्यत्व, स्वत्व, शरीरत्व, धार्मयत्व, रक्ष्यत्व भोग्यत्वाज्ञत्वाशक्तत्वापूर्णत्व रूपाकारांश्चा- नुसन्धाय निवर्त्तय दुःखम् वा निवर्त्कान्तरशून्योऽहमिति प्रकारेणोपायविषय सर्वभारांश्च तद्विषये न्यस्य निर्भरतयावर्त्तेत।

आचार्यिमानो नाम एतेष्वेकस्मिन्नपि शक्तिरहितङ्कञ्चनोद्दिश्य तस्य च्युतिश्चैतस्य जायमानां प्रीतिं चानुसन्दाय स्तनन्धयप्रजाया व्याधौ सत्यां तत्स्वदोषत्वेनानुसन्धाय स्वयमौषधसेवां कर्त्री मातेवैतन्निमित्तं स्वयमेवोपायानुष्टानं कृत्वा रक्षितुं शक्तस्य परमदयाळोः महाभागवतस्याभिमानेऽन्तर्भूय उचितोपायं ज्ञापयन्ति चेत्तं पश्यामीत्युक्तप्रकारेण सकलप्रवृत्तिनिवृत्तीनां तदाधीन्यापादनम् ।

भगवतःस्वयं प्राप्यत्वेऽपि सकलदेवतान्तर्यामित्वेन प्राप्यत्ववदस्याचार्याभिमानस्य स्वातन्त्र्येणोपायत्वेऽपि सर्वेषामुपायानां सहकारी स्वतन्त्यश्च भवति।

विरोधिवर्गे स्वरूपविरोधी नाम देहात्माभिमानमन्यशेषत्वं स्वस्वातन्त्र्यञ्च ।

परत्वविरोधी नाम देवतान्तरेषु परत्वप्रतिपत्ति समत्वप्रतिपत्तिः क्षुद्रदेवताविषयेषु शक्तियोगप्रतिपत्तिरर्चावतारेष्वशक्तियोगप्रतिपत्तिश्च ।

पुरुषार्थविरोधी नाम पुरुषार्थान्तरेष्विच्छा स्वाभिमतभगवत्कैङ्कर्येष्विच्छा च।

उपाय विरोधी नाम उपायान्तरवैलक्ष्यण्यप्रतिपत्तिरूपाय लाघवमुपेयगौरवं विरोधि बाहुळ्यञ्च। प्राप्विविरोधी नाम, प्रारब्धशरीरसम्बन्धोऽनुतापशून्यगुरुस्थिर भगवदपचार भागवदापचारासह्यापचारप्रभृतयस्सर्वे विरोधिन इत्युच्यन्ते। अन्नदोषो क्षानविरोधी सहवासदोषो भोगविरोध्यभिमानः स्वरूपविरोधी।

एवमर्तपञ्चकज्ञानोत्पत्या मुमुक्षोः संसारे वर्त्मानस्य चेतनस्य मोक्षसिद्धिपर्यन्तं संसारसम्बन्धार्थं कालक्षेपप्रकारः। वर्माश्रमानुरुपमशनाच्छादने सम्पाद्य यदन्नःपुरुषो भवति तदन्नास्तस्य देवेताः इत्युक्तप्रकारेण सकलपदार्थानपि भगवद्विषये निवेद्य यथाबलं भागवतकिञ्चित्कारं कृत्वा देहधारणमात्रं प्रसादप्रतिपत्या जीवेत। कथञ्चित्तत्त्वज्ञानोत्पादकस्य आचार्यस्य सन्निधौ किञ्चित्कारेण तदभिमतो वर्त्तेत। ईश्वरसन्निधौ स्वस्य नीचत्वमनुसन्दधीत। आचार्यसन्निधौ स्वस्य अज्ञानमनुसन्दधीत । संसारिणामग्रे स्वव्यावृत्तिमनुसन्दधीत । प्राप्ये त्वरा प्रापकेऽध्यवसायो विरोदिनभयमितरविषयु अरचिः स्वदेहऽरुचिः स्वरूपज्ञानं स्वरक्षणेऽशक्तिरार्त्तिश्चोद्दिश्य विषये गौरवमुपकारिविषये कृतज्ञतोत्तरारकप्रतिपत्ति श्चैतेऽनुवर्त्तेरन् । एवं ज्ञानानुष्ठाभ्यां युक्तो वर्त्तमान ईश्वरस्य दिव्यमहिषीभ्यो नित्यमुक्तेभ्यश्चात्यन्ताभिमतो भवेत् ।

**उपयुक्तग्रन्थसूची**


1. ब्रह्माण्डपुराणम्
2. पुराणविमर्शः
3. विशिष्टाद्वैतपदकोशः
4. श्रुतप्रकाशिका
5. भगवद्गीता
6. विष्णुपुराणम्